SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/06/2025
Volume – 7
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# छान्दोग्योपनिषदि प्रतिपादिता शिक्षणपद्धतिः

**डॉ. परिमलमण्डलः**

## सारांशः -

छान्दोग्योपनिषद्, सामवेदशाखान्तर्गता महत्वपूर्ण एका उपनिषत्। ब्रह्मविद्याऽत्मज्ञानयोर्गुढविश्लेषणेन सह अस्याम् उपनिषदि प्राचीन भारतीयशिक्षणपद्धत्याः पूर्णरूपेणाभिज्ञतालब्धं मूल्यनिष्ठञ्च दर्शनम् उररीकृतम्। अस्याम् उपनिषदि वेदोद्घोषस्य स्मरणप्रतीकदृष्टानाप्रश्नोत्तरोपासनाभिज्ञताः आदाय एव शिक्षायाः स्वरूपं सामग्रिकाध्ययनपद्धतिरूपेण प्रतिष्ठितम्।

उपस्थापिते शोधे अभिज्ञतालब्धस्य सूत्रभित्तिकस्य प्रश्नोतरमूलकस्य सहयोगितामूलकस्य परीक्षामूलकस्य एकालापभित्तिकोपासनाकेन्द्रिकस्य चेति प्रधानभूतानां पञ्च शिक्षणपद्धतीनां विश्लेषणं कृतम्। अनेन अध्ययनेन इदं स्पष्टं भवति यत् औपनिषदीया शिक्षणपद्धतिः शिष्ययोग्यताजिज्ञासासाधनस्तराणाञ्चोपरि निर्भरशीला। तस्याः उद्देश्यं च आत्मसाक्षात्कारमार्गं प्रति प्रवृत्तस्य शिष्यस्य पथ प्रदर्शनप्रदानम्।

## कूटशब्दाः -

*शिक्षणपद्धतिः, गुरुशिष्यपरम्परा, प्रतीकमूलकशिक्षणम्, दृष्टान्तपद्धतिः, प्रश्नोतरधारा।*

**डॉ. परिमलमण्डलः**

सहायकाध्यापकः, संस्कृतविभागः
स्वर्णमयी-योगेन्द्रनाथ-महाविद्यालयः
पूर्वमेदिनीपुरम्, पश्चिमबङ्गः
अणुवाक्-संकेतः-
parimalbhu@gmail.com
दूरभाषः- 9647704736

## प्रस्तावना -

भरतीयज्ञानपरम्परायाम् उपनिषदः अत्यन्तं विशिष्टस्थानं भजन्ते। यत्र आत्मज्ञानं ब्रह्मतत्त्वं मोक्षरहस्यञ्च साङ्केतिकतया दृष्टान्तात्मकरूपेण संलापप्रधानपद्धतिद्वारा च प्रकटीभवन्ति । एतासु उपनिषत्सु छान्दोग्योपनिषत् एका मुख्या उपनिषद्। या च सामवेदीयताण्डयशाखायाः छान्दोग्यब्राह्मणस्याङ्गभूता। **"छान्दोग"**शब्दस्यार्थस्तावत्

**"छन्दः सामवेदं गायति इति छन्दोगः सामवेदाध्यायी विप्रादिः॥"**[1]

अर्थात् सामवेदाध्ययनकारी ब्राह्मणः। ब्राह्मणक्षत्रियवैश्यैः एतैः त्रैवर्णिकैः अध्येतृभिः गीताः मन्त्राः ब्रह्मरूपाणि च शास्त्राण्येव **"छान्दोग्योनिषत्"**इत्यनेन आख्यायन्ते। छान्दोग्योनिषत् अष्टौ प्रपाठकैः विभक्ता। ते च प्रपाठकाः पुनः प्रत्यध्यायं खण्डशः अध्यायशः बहुधा विभक्ताः। अस्याम् उपनिषदि गुरुशिष्ययोः बहवः संलापाः उपलभ्यन्ते। तस्मिन् च प्रभावशालिनी शिक्षणशैली अपि दृश्यते। यथा प्रवाहनजैवाल्योः पञ्चाग्निविद्या सत्यकामजावालयोर्ब्रह्मजिज्ञासा, उपकोसलस्यात्मविद्यायाः अभिज्ञता, नारदसनत्कुमारयोः **"भूमा विद्या"**श्वेतकेत्वौद्दालकयोश्च तत्त्वमस्यादिना प्राप्ता शिक्षा। सत्स्वपि प्रथागतेषु समस्तसंलापेषु सर्व एते शिक्षकस्य नूतनपद्ध्याः प्रमाणं वहन्ति। एतेषां संलापानां पटभूमौ गुरुशिष्यपरम्परायाः विशिष्टं माहात्म्यं प्रकाशते। अत्र गुरु मार्गदर्शकः यः शिष्यस्य योग्यताजिज्ञासादक्षतानुगुनं प्रतीकदृष्टान्ताभिज्ञताभिः आत्मज्ञानाभिमुखं शिष्यं मार्गयति अनुप्राणयति च। छान्दोग्योपनिषदः ज्ञानसञ्चाररीति समन्विता व्यापकपथस्वरूपा च यत्र क्षत्रियाः सामान्यजनः प्रकृतिः पशवश्च गुरुरूपेण स्वीकृताः। समानरूपेण सत्यकाम इव परम्परारहितज्ञिज्ञासवोऽपि योग्यशिष्यरूपेण स्थानं भजन्ते। उपनिषदां इयं समन्विता दृष्टिः तासां शिक्षणपद्धतिं व्यापकीभूतां कालोत्तीर्णां च करोति। प्रतीकोदाहरणध्यानाभिज्ञताद्वारा प्रदत्ता शिक्षा छान्दोग्योपनिषदं शिक्षणदर्शनस्य सजीवैकभित्तिरूपेण प्रतिष्ठापयति।

## छान्दोग्योपनिषदः शिक्षणपद्धतिः -

छान्दोग्योपनिषदः शिक्षणपद्धतिः मनश्चरितचेतनानामन्तस्स्थलपर्यन्तगता बौद्धिकनैतिकाध्यात्मिकविकासस्य चैका सामग्रिकप्रक्रिया। गुरुः इह आत्मबोधस्य पथप्रदर्शकः शिष्यश्च साधनशीलः जिज्ञासु। इयं शिक्षा प्रतीकदृष्टान्तोपासनाभिज्ञतासल्लापप्रश्नप्रतिवचनैः प्रकाश्यते।

1. छान्दोग्योपनिषद्, सम्पादकः नलिनीनाथरायः, पृष्ठा- 03

शङ्कराचार्याणां मते तु श्रद्धा, अन्नदानं, नम्रता चैते त्रयो गुणाः शिक्षायै अपरिहार्याः। श्रीमद्भगवद्गीतायामपि प्रतिपादितशिक्षणसंस्कृतिना सार्धमिदं दर्शनं सङ्गतिमेति -

**"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।"**[2]

अर्थात् नम्रतया, जिज्ञासया, सेवया च ज्ञानावाप्तिः शक्या। इत्थं च छान्दोग्योपनिषदि शिक्षायाः बह्वी पद्धतिः निहिता। प्रस्तूयमानशोधपत्रे तासु प्रधानाः पञ्च शिक्षणपद्धतयः आलोच्यन्ते। ताश्चानुभावात्मकसूत्रभित्तिकप्रश्नोत्तरात्मकसहयोगितामूलकपरीक्षामूलकैकलापीयोपासनाभित्तिकशिक्षणपद्धतयः।

## १. <u>अनुभावात्मकशिक्षणपद्धतिः</u> -

छान्दोग्योपनिषदि ज्ञानं प्रत्यक्षाभिज्ञतारूपेण उपस्थापितं यदवश्यं जीवनद्वारा अनुभूय ज्ञेयम्। तस्मादेव अत्र अनुभवात्मकशिक्षणपद्धतिः आधिक्येन माहात्म्यम् अलभत। अस्यां पद्धत्यां गुरुः शिष्यं तादृशं ज्ञानं दृष्टान्तं च उपदिशति येन ब्रह्मविद्या आत्मविद्या वा प्रत्यक्षबोधस्य विषयो भवति। अस्य प्रकृष्टोदहरणं उपकोसलस्य कथाप्रसङ्गे प्राप्यते। यत्र अन्यशिष्यवद् गुरुः सत्यकामः न तस्मै गृहं प्रत्यवर्तयितुम् आदिदेश। गुरुकुलम् उपस्थाय एव उपकोसलः अग्नेः उपासनं चकार। तैरेव अग्निभिः सः आत्मवाबोधम् प्राप्यत। अस्य ज्ञानस्य लाभानन्तरमेव गुरुः तम् गृहं प्रत्यावर्तयति[3]। अनेन प्रसङ्गे इदं स्पष्टं ज्ञायते यद् छान्दोग्योपिषदि शिक्षा न केवलं उपदेश अपि तु साधनाभिज्ञतयः तादृशी प्रक्रिया या आत्मज्ञानार्थं शिष्याय अवसरं कल्पयति। संबद्धविषयगतमेकमुदाहरणं छान्दोग्ये षष्ठे प्रपाठके उपलभ्यते यत्र कश्चन पिता स्वसूनुं ब्रह्मात्मनोः अद्वैतस्वरूपं बोधनाय दृष्टान्तम् उपस्थापयति - यथा मृदा निर्मिते सर्वस्मिन् पात्रे मिदेव मूलं तत्त्वम्। सुवर्णेन निर्मिता सर्वस्मिन् वस्तूनि स्वर्णमेव मूलं तत्त्वम् इत्यादि।

प्रसङ्गोऽयम् संलापात्मकः सन् अभिज्ञता लब्धोऽपि अस्ति। यतो हि पिता स्वेतकेतुना सह संलापद्वारा प्रत्यक्षोदाहरणेन तम् आत्मतत्त्वं बोधयति। एतैः दृष्टान्तैः स्पष्टं भवति यद् सृष्टेः समस्तवैचित्रस्य मूले सर्वव्यापि एकमेव ब्रह्मतत्त्वं प्रतिष्ठितम्। अस्याः पद्धात्याः वैशिष्ट्यं भवति - शिष्यः शिक्षणप्रक्रियायां सक्रियरूपेण भागं गृह्णाति, साधनशीलसाधकरूपेण आत्मानं च प्रकाशयति।

---

2. श्रीमद्भगवद्गीता 4/34
3. छान्दोग्योपनिषद्, 4/10–15 खण्ड

अधूनिकशिक्षागतपरिभाषयाम् इयं "निर्देशित- स्व - शिक्षणपद्धतिः" इति उच्यते[4]। अस्याः उद्देश्यं तावत् प्रत्येकस्य छात्रस्य शक्तिदौर्बल्यप्रयोजनदक्षताग्रहानुगुनम् शिक्षणपद्धत्याः उपयोगि स्वरूपनिर्धरणम्।

## २.सूत्रात्मकशिक्षणपद्धतिः-

छान्दोग्योपनिषदि शिक्षणस्य विविधपद्धतिसु सुप्रसिद्धा एका पद्धतिर्भवति सूत्रात्मकशिक्षणपद्धतिः, यत्र अत्यन्तं संक्षिप्ततया किन्तु गूढतात्पर्यपूर्णवाक्येन (सूत्रेण) ज्ञानं प्रकाश्यते। इयं शैली वैदिकभाषायाः चिन्तामूलकपरम्परायाश्च प्रतिफलितस्वरूपभूता, यत्र एकस्मिन् लघुवाक्ये एव समग्रं दर्शनम् अन्तर्भवति। न केवलम् इयं शैली उपनिषत्सु सीमाबद्धा अपि तु भारतीयदर्शनस्य व्याकरणस्य च प्रायः सर्वाः मुख्यपरम्पराः एव शिक्षणार्थं ग्रन्थरचनायै सूत्रात्मकशिक्षणपद्धतिं उपयुक्तवत्यः। पाणिनेः अष्टाध्यायी, पतञ्जलेः योगसूत्रम्, बदरायानस्य ब्रह्मसूत्राणि, जैमिनिः मीमांसासूत्रम्, गौतमस्य न्यायसूत्रं च प्रभृतिग्रन्थे संक्षिप्तवाक्येन गूढं ज्ञानं सन्निविश्य गुरुशिष्यपरम्परया व्याख्यात्मकशिक्षणं प्रोत्साहितम्। परम्परायामस्यां सूत्रपाठतत्स्मरणम् ततश्च तदीयभाष्यटीकासमूहैः अर्थोद्घाटनमित्यासीत् अस्याः पद्धत्याः मूलप्रक्रिया।

छान्दोग्योनिषदि अस्याः पद्धत्याः उत्कृष्टोदहरणं भवति चतुर्षु महावाक्येषु अन्यतमं महावाक्यं **"तत्त्वमसि**[5]"इति। अनेन सूत्रवाक्येन ऋषिः उद्दालकः श्वेतकेतुमिदं बोधयति यदात्मब्रह्मयोर्नास्ति भेदः अपितु उभयमपि एकमेव तत्त्वम्। समानरूपेण**"सर्वं खल्विदं ब्रह्म**[6]"इति वाक्ये ब्रह्मणः सर्वव्यापिता प्रतिपाद्यते। तद्रूपेण**"आत्मैवेदं सर्वं**[7]"इति वाक्येन प्रकाश्यते यद् जगतः मूलम् आत्मैव। अस्य सूत्रात्मकशिक्षणस्य अयं लाभः यद्, ज्ञानमिदं शब्दगतविस्तरात्साक्षात् विमुच्य चैतन्यस्तरे स्थापयति। इयं शैली तत्कालीनसमये विशेषतया कार्यकरी आसीत्। तदा स्मृतिनिर्भरपरम्परा एव आसीत् ज्ञानोपलब्धौ परमः पन्थाः। आधुनिकशिक्षाविज्ञाने पद्धतिमिमाश्रीत्य न तथा प्रभावो दृश्यते। साहित्यक्षेत्रे कदाचित् लेखनस्य सूत्रत्मकशैली किञ्चित् अलोचिता[8]।

---

4. https://www.indica.today/research/conference/the-upanisadic-way-of-pedagogy-ideas-derived-from-the-guru-sisya-parampara-embedded-in-the-chandogya-upanisad/दिनाङ्कः 17.06.2025 समयः 6.45 AM
5. छान्दोग्योपनिषद्, 6/8/7
6. छान्दोग्योपनिषद्, 3/14/1
7. छान्दोग्योपनिषद्, 7/25/2
8. https://www.indica.today/research/conference/the-upanisadic-way-of-pedagogy-ideas-derived-from-the-guru-sisya-parampara-embedded-in-the-chandogya-upanisad/ दिनाङ्कः 17.06.2025 समयः 8.15 PM

## ३.प्रश्नोत्तरात्मकशिक्षणपद्धतिः-

प्रश्नोत्तरशिक्षणपद्धत्या छान्दोग्योनिषदि शिक्षायाः अत्यन्तं सक्रियं गूढं च रूपं प्रकाशते। यत्र ज्ञानस्य सम्प्रेषनं शिष्यस्य जिज्ञासया गुरोः समाधानमूलकोत्तरद्वारा सङ्गतिमेति। इयं पद्धतिः न केवलं ज्ञानं वितरति अपितु चिन्तनशीलं शिष्यं आत्मपरिकल्पकं तत्त्वान्वेषिणं च कर्तुं अनुप्राणयति। इयं शिक्षणपद्धतिः छान्दोग्योपनिषदा सह प्रश्नोपनिषदि, केनोपनिषदि, बृहदारण्यकोपनिषदि, मुण्डकपनिषदि च विस्तररूपेण दृश्यते। यत्र गुरुशिष्ययोः संलापमाध्यमेन ज्ञानस्य क्रमोन्नातिः परिलक्ष्यते।

प्रश्नोपनिषदि विषेशतः षड् जिज्ञासवः ऋषयः पिप्पलादम् उपसन्नाः मनःप्राणपुनर्जन्ममोक्षप्रभृतिविषये प्रश्नं चक्रुः। येषामुत्तरद्वारा ज्ञानस्य तात्त्विकविस्तारो भवति। केनोपनिषदि **"केनेषितं पतति प्रेषितं मनः[९]?"**इति प्रश्नेन चैतन्यस्य सूक्ष्मतमस्तरस्यानुसन्धानं कृतम्। इयं संलापात्मिका शैली उपनिषदि ज्ञानं शिष्यजिज्ञासया उद्भूतवितर्केन क्रमशः उन्मुच्यते इति प्रमाणयति। छान्दोग्योपनिषदि अस्याः पद्धत्याः उत्कृष्टोदाहरणं परिलक्ष्यते श्वेतकेतुप्रवाहणजैवल्योः संलापे। इह ब्राह्मणशिष्यः श्वेतकेतुः स्वकीयपाण्डितम् अहङ्कृत्य राजानं प्रवाहणजैवलिमुपससार। तदा राजा जीवनप्रेतगतिविषये तं पप्रच्छ। श्वेतकेतुः एतेषां प्रश्नानामुत्तरं दातुम् अशक्तः सन् सलज्जं पितरं प्रत्यागच्छति। तदा तु ऋषि उद्दालकः स्वयं प्रवाहणजैवलिं निकषा गतवान् किञ्च तत्र शिष्यरूपेण उपविश्य तस्मात् ब्रह्मविद्यायाः दीक्षां गृहीतवान् ।[10] सन्दर्भेऽस्मिन् शिक्षककर्तृकप्रश्नोत्थापनं तदुत्तरेन च ज्ञानप्रदानम् इत्युभयोः उत्तमः समन्वयः दृश्यते।

अन्या एका घटना शिलकदालभ्यप्रवाहणजैवलीनाञ्च मध्ये दृश्यते। यत्र शिलकदालेभ्यौ उभयोर्मध्ये ब्रह्मविद्यामुरारीकृत्य वादं कुरुतः अन्ततश्च प्रवाहणजैवलेः सकाशात् प्रकृष्टं ज्ञानम् आप्नुताम्[11]। आधुनिकशिक्षा विज्ञानस्य परिप्रेक्ष्ये प्रश्नोत्तरपद्धत्याः लक्ष्यं तादृशप्रश्ननिर्माणे स्यात् येन शिक्षार्थिनः स्मृत्यनुधवनप्रयोगक्षमता सक्रिया भवेत्। इयं पद्धतिः शिक्षार्थिनः मूलावधरणम् प्रति मनोनिवेशने सहायभूता भवति, शिक्षणचिन्तनं च उद्बोधयति, शिक्षर्थिनाम् अनुधवनस्तरणुगुनम् शिक्षणकौशले नमनीयताप्रदाने शिक्षकं सहकरोति[12]।

9. केनोपनिषद 1/1
10. छान्दोग्योपनिषद् 5/ 3– 10 खण्ड
11. छान्दोग्योपनिषद् 5/11-13 खण्ड
12. https://www.indica.today/research/conference/the-upanisadic-way-of-pedagogy-ideas-derived-from-the-guru-sisya-parampara-embedded-in-the-chandogya-upanisad/ दिनाङ्कः 18.06.2025 समयः 4.50 PM

## ४. सहयोगात्मिका परीक्षणात्मिका च शिक्षणपद्धतिः-

सहयोगात्मकपरीक्षणात्मिका शिक्षणपद्धतिः सा रीतिः यत्र सर्वे छात्राः साकल्येन एव कस्मिंश्चित् कर्यकलापे कर्मकाण्डे वा भागं गृह्णन्ति, येन ते विषयात्मकज्ञानम् अर्जयन्तः तस्य प्राकृतप्रत्यभिज्ञामपि लभन्ते। अस्मिन् क्षेत्रे शिक्षार्थिनः कस्यचित् साधारणसमस्याः समाधानं कुर्वन्ति अथवा भिन्ने भिन्ने अंशे अवदानं प्रदाय एकस्मिन् समग्रिकसिद्धान्ते उपनीताः भवन्ति।

छान्दोग्ये पञ्चमप्रपाठकस्य प्रथमे खण्डे अस्याः पद्धत्याः उल्लेखः प्राप्यते[13]। यत्र वाङ्मनश्चक्षुरादीन्द्रियाणि परस्परं कः श्रेष्ठः इत्यस्मिन् विषये विवादं चक्रुः। तदा तानि इन्द्रियाणि प्रजापतिम् उपसन्नानि तदनुज्ञातानि एकैकं शरीरात् विच्छिद्य परीक्षणं चक्रुः यद् तेषां अनुपस्थितौ वपुः कियत् सचलं तिष्ठति। सर्वन्ते यदा प्राणः शरीरं त्यक्तुं उद्यतो भवति तदा सकलानि इन्द्रियाणि दौर्बल्यं गतानि शरीरत्यागं न कर्तुं प्राणं प्रार्थयन्ते। इयं घटना इन्द्रिय समूहानां पारस्परिकसहयोगिताभिज्ञताभित्तिकज्ञानस्य स्विकृतिं प्रददाति।

एतद्विहाय षष्ठप्रपाठके[14] ऋषिः उद्दालकः स्वपुत्रं श्वेतकेतुं ब्रह्मतत्त्वबोधनार्थं पारीक्षोदहरणे आश्रयते। यथा वटवृक्षस्य बीजं विच्छिद्य दर्शयते यद् आदृश्यादप्यणोः विशलसृष्टिः सम्भवति। "तत्त्वमसि"इति महावाक्येन शिष्याय सिद्धान्तः उच्यते। गुरुः न केवलम् उपदिशति अपि तु शिष्यस्य चिन्तन प्रक्रियायां भागग्रहीता अपि भवतीति रीतिरियम् निर्दिशति। आधुनिकशिक्षाविज्ञानम् अपि ब्रूते यद् त्री-पञ्च छात्राणां संघगतसहयोगि शिक्षणम् अधिकं फलप्रसारि। विशेषतः तदा, यदा तेभ्यः गणशः कार्यं दायित्वं वा प्रदाय शिक्षकः तान् परीक्ष्य प्रायशः प्रतिक्रियां यच्छति। इयं प्रक्रिया "उच्चप्रत्यशाभित्तिकशिक्षणम्[15]" इत्यत्र अन्तर्भवति। छान्दोग्योपनषदि इयं पद्धतिः स्पष्टरूपेण उपस्थापिता। यत्र ज्ञानस्य उद्देश्यं न केवलं श्रवणम् अपि तु अभिज्ञतया परीक्षया पारस्परिकसहयोगिताद्वारा आत्मावबोधद्वारा च शिष्याय पुरोगामि दिग्दर्शनम्।

## ५. एकालापीया उपासनाभित्तिकशिक्षणपद्धतिश्च-

छान्दोग्योपिषदि एतादृशी बह्वी शिक्षणपद्धतिः उपलभ्यते यत्र गुरु शिष्ययोर्न कोऽपि साक्षात् संलापो भवति। अपितु तत्र शिक्षणं मौनप्रतीकध्यानादिमाध्यमेन विकसति। इयं पद्धतिः प्रधानतः एकालापीया यत्र एकमुखी गुरुः ज्ञानं यच्छति शिष्यश्च मौनी श्रोता इव तज्ज्ञानं आत्मत्स्थं करोति।

13. छान्दोग्योपनिषद् **5/1/6–15**
14. छान्दोग्योपनिषद् 6/12/1-3
15. https://www.indica.today/research/conference/the-upanisadic-way-of-pedagogy-ideas-derived-from-the-guru-sisya-parampara-embedded-in-the-chandogya-upanisad/ दिनाङ्कः 19.06.2025 समयः 7.40 PM

केषुचित् क्षेत्रेषु इयम् एकालापीया रीतिः उपासनेन भवति, यत्र प्रतीकध्यानमौनचिन्तनाभ्याम् आत्मवबोधः लभ्यते। अस्य उत्कृष्टोदहरणम् उपलभ्यते पञ्चमप्रपाठके यत्र उपकोसलनामधेयः शिष्यः गार्हपत्यः दक्षिनाग्निः आहवनीयः इति त्रीन् अग्नीन् उपास्ते। एते अग्नयः एव तस्मै ब्रह्मविद्यां प्रददति। अत्र गुरुः मौनरूपेण आस्ते। अग्नयश्च तेषां चतुर्भिः स्वकीयैः शरीरैः (यथा पृथिवी, अग्निः, अन्नम्, सूर्यः, इत्यादि) बोध्यते यद् समग्रं जगत् एकस्मिन्नेव परमतत्त्वे प्रतिष्ठितम्। अस्मिन् शिक्षणे प्रस्नोत्तरयोः किमपि स्थानं नास्ति। शिष्यः केवलं मौनेन समर्पणभावेन च ज्ञानम् अवाप्नोति। इदं दर्श्यते यद् शिष्यः यदा साधने परिपक्कः भवति तदा मौनता स्वयमेव शिक्षणस्य द्वारं भवति[16]।

एतद्विहाय, चतुर्थे प्रपाठके सत्यकामजावालं तद्गुरुः गोपालाय निर्दिशति। तत्र एकैकशः वृषाग्निहंसमदगवः प्रतीकरूपेण प्रकाशिताः सन्तः ब्रह्मणः स्तम्भरूपां चतुष्पादात्मिकां वा शिक्षां शिष्याय प्रददाति। संपूर्णशिक्षणप्रक्रियायां सत्यकामः केवलं "भगवन्!"इति सम्बोधनद्वारा उत्तरति गम्भीरं तत्त्वज्ञानं च मौनेन आत्मस्थं करोति[17]। एतानि उदाहरणानि एकलापीयशिक्षणस्य अनन्यरूपं निर्दिशति। यत्र प्रकृत्या प्रतीकेन मौणातया च ज्ञानम् उन्मोचितं भवति। साकल्येन इदं उपासनाभित्तिकशिक्षणपद्धतिमपि लक्षयति, यत्र ध्यानं प्रतीक्यनुभवश्च शिक्षायाः मुख्यौ उपायौ भवतः। आधुनिकशिक्षाविज्ञाने इयं पद्धतिः **"प्रत्यक्षनिर्देशनपद्धतिः"** इति नाम्ना आख्यता, यच्च शिक्षककेन्द्रिक शिक्षणस्य आदिमं रूपम्। कार्टोलारी[18] प्रमुखः (२०१३) वदति यद् शिक्षर्थिनः यदा कस्मिंश्चित् विषये अनभिज्ञा भवन्ति तदा एकालपीयशिक्षणं प्राथमिकपर्याये उपयोगि भवति। किन्तु अस्याः पद्धत्याः अतिरिक्ततया व्यवहारः शिक्षर्थिणः सृजनशीलत्त्वम् भागग्रहणमनस्कतां शीथिलीकर्तुं शक्नोति। उपनिषदः सन्दर्भे दृश्यते यत् इयं पद्धतिः न केवलं प्रथमिकशिक्षणरूपा अपितु प्राज्ञध्याननिष्ठशिष्याय मौनोपासनाभ्यां गूढतत्त्वप्रदानस्य श्रेष्ठः उपायः अपि आसीत्।

## निष्कर्षः

छान्दोग्योनिषदि वर्णितशिक्षणपद्धतिसमूहः प्राचीनभारतीयज्ञानपरम्परायाः अमूल्यमेकम् ऐतिह्यं किञ्च आधुनिकशिक्षणव्यवस्थायाः दार्शनिकचेतनायाः नैतिकभावनायाः क्षेत्रे अपि अत्यन्तं प्रसङ्गिकः। इयम् उपनिषद् शिक्षां तत्त्वविनिमयस्य प्रक्रियारूपेण न मनति अपितु तां आत्मबोधस्य, चरित्रगठनस्य, आभ्यन्तरीनविकासस्य गूढयात्रारूपेण प्रतिष्ठापयति। गुरुशिष्यपरम्परामाध्यमेन इह तादृशः एकः शिक्षण परिवेशः निर्मीयते यत्र प्रत्येकस्य शिष्यस्य जिज्ञासां पात्रताम् वैयक्तिकाभिज्ञतां

16. छान्दोग्योपनिषद्, 4/10-15 खण्ड
17. छान्दोग्योपनिषद्, 4/4-8 खण्ड
18. https://www.aacademica.org/paula.carlino/181.pdf दिनाङ्कः 19.06.2025 समयः 7.30 PM

गुरुत्त्वप्रदानद्वारा शिक्ष प्रदीयते। इयं शिक्षा अन्ततः अद्वैतबोधम् अर्थात् एकत्त्वनुभवं प्रति नयति, यत्र ज्ञानात्मनौ प्रश्नोत्तरे, गुरुशिष्यौ, सर्वे एते एकात्मकतायां लीनाः भवन्ति। वर्तमानशिक्षाव्यवस्थायां यत्र विषयवस्तुनः खण्डीकरणं, कण्ठस्थीकरणशैली, आनुष्ठानिकतायाः आधिपत्यं वर्धते तत्र छान्दोग्योपिषदि प्रस्तावितशिक्षणपद्धतयः सशक्तविकल्परूपेण अविर्भवन्ति याः जीवनेन सह ज्ञानस्य संयोगं आचरन्ति शिक्षणं चाधूनिकाध्यात्मिकसाधनरूपेण पुनस्संज्ञायति। अस्य गवेषनस्य परिणतौ स्पष्टरूपेण प्रतीयते यद् उपनिषत्समूहस्य शिक्षणपद्धतयः न केवलं तत्कलीकं वास्तविकतां भजन्ते अपितु कालोत्तीर्णा एका दृष्टिः या प्रत्येकस्मिन् युगे शिक्षर्थिनां कृते उपयुक्तगभीरोद्देश्यपूर्णमार्गं निर्दिशति।

**सन्दर्भग्रन्थाः**


1. अड़गड़ानन्दजी, स्वामी श्री. **यथार्थ गीता (हिन्दी**). मुम्बई: श्री परमहंस स्वामी अड़गड़ानन्दजी आश्रम ट्रस्ट, 2017.
2. आत्मानन्द, स्वामी. **गीतातत्व-चिन्तन**. कोलकाता: अद्वैत आश्रम (प्रकाशन विभाग), 2016.
3. **Bodewitz, H. Uddālaka's Teaching in Chāndogya Upaniṣad**, *Indo-Iranian Journal*, 44(4), 289–298, 2001.
4. **Jha, G. The Chandogya Upanishad: A Treatise on Vedanta Philosophy Translated into English with the Commentary of Sankara**, Poona: Oriental Book Agency, 1942.
5. **राय, श्रीनलिनीनाथ (ed.) छान्दोग्य उपनिषद**, कलिकाता: वसुमति साहित्य मन्दिर, 1936.
6. **सरस्वती प्रज्ञानन्द(ed.), केनोपिनिषद्, वाराणसी. चौखम्भा संस्कृत संस्थान, 2017**

**अन्तर्जालसन्दर्भाः -**

7. https://www.indica.today/research/conference/the-upanisadic-way-of-pedagogy-ideas-derived-from-the-guru-sisya-parampara-embedded-in-the-chandogya-upanisad/ दिनाङ्कः 19.06.2025 समयः 7.40 PM
   https://www.aacademica.org/paula.carlino/181.pdf दिनाङ्कः 19.06.2025 समयः 7.30 PM